# ॥ अभ्यासपाठः ५ ॥

अत्र अधोरेखाङ्कितानां भूतकृदन्तानां स्थाने कृयापदानां प्रयोगम् कृत्वा तां कथं पुनः पठतु ।

## कुलोचितः व्यवहारः

विजयपुरस्य राजा वीरवर्मा ।कुलोचितेषु व्यवहारेषु महान् आदरः तस्य ।कदाचित् सः सभासमाप्तेः अनन्तरं विदूषकेण सह विनोदवार्तालापे मग्नः आसीत् ।तदा द्विवर्षीयः राजकुमारः कुमारवर्मा मन्दं पदानि स्थापयन् तत्र आगतवान् ।

राजा सन्तोषेण पुत्रम् उन्नीय सिम्हासने उपवेश्य "वत्स! राजगाम्भीर्यं कथं भवति इति प्रदर्शयतु तावत् ।विदूषकः पश्यतु तत्" इति उक्तवान् ।

राजकुमारः पितुः आशयं जानन् पादस्य उपरि पादं सम्स्थाप्य रजगाम्भीर्येण सिम्हासनस्य उपरि उपविष्टवान् ।

एतत् दृष्ट्वा महता सन्तोषेण राजा विदूषकम्
उक्तवान् ह् स
"दृष्टं खलु भवता? एतस्मिन् एव वयसि एषः राजकुलोचितव्यवहारं सम्यक् जानाति" इति ।

तदा विदूषकः स "प्रभो! भवतः पुत्रः खलु सः? वृक्षस्य स्वरूपम् अङ्कुरावस्थायाम् एव ज्ञायते ।सिम्हस्य शिशुः सिम्हः एव भवति, नान्यः" इति उक्तवान् ।

विदूषकेण कृतया एतया प्रशम्सया सन्तुष्टः राजा एकं मणिहारं विदूषकाय दत्तवान् ।विदूषकः कृतज्ञतापूर्वकं
स्वीकृतवान् ।

राजकुमारः सिम्हासनात् अवतीर्य क्रीडने मग्नः जातः । तदा विदूषकः राजकुमारम् उक्तवान् स "वत्स! पुनरपि एकवारं राजगाम्भीर्यं प्रदर्शयतु तावत्" इति ।

किन्तु एतत् अशृण्वन् इव राजकुमारः क्रीडने मग्नः स्थितवान् । एतत् दृष्टवतः राज्ञः मुखं म्लानं जातम् ।

तदा विदूषकः हसन् उक्तवान् स "प्रभो! पुनरपि भवत् पुत्रेण कुलोचितः एव व्यवहारः प्रदर्शितः । 'राज्ञः पितुः ऋते अन्यस्य कस्यापि वचनं न पालयामि' इत्येतम् अम्शस्वव्यवहारेण प्रदर्शितवान् अस्ति राजकुमारः" इति ।

विदूषकस्य एतां चतुरोक्तिं शृत्वा नितरां सन्तुष्टः राजा तस्मै अपरम् अमूल्यं हारं प्रदत्तवान् ।

---

Encoded by Sarada Susarla

---

Please send corrections to sanskrit@cheerful.com
Last updated August 15, 2003